National Journal of
Hindi & Sanskrit Research

ISSN: 2454-9177
NJHSR 2026; 1(66): 167-169
© 2026 NJHSR
www.sanskritarticle.com

**प्रतिभा साहू**
विद्यावारिधिच्छात्रा,
राष्ट्रियसंस्कृतविश्वविद्यालयः, तिरुपतिः

**Correspondence:**
**प्रतिभा साहू**
विद्यावारिधिच्छात्रा,
राष्ट्रियसंस्कृतविश्वविद्यालयः, तिरुपतिः

# कृषि तथा भारतीयपर्वाणी- एकमध्ययनम् ।

**प्रतिभा साहू**

**सारांशः**

अस्मिन् शोधलेखे **'कृषिः तथा भारतीयपर्वाणी'** इत्यस्य विषयस्य व्यापकं विवेचनं क्रियते। भारतीयजीवनव्यवस्थायां कृषेः मूलभूतं स्थानं प्रकाश्यते, या केवलं जीवनोपार्जनस्य साधनं न अपितु संस्कृतेः, सामाजिकमूल्यानां तथा आध्यात्मिकदृष्टेः अपि आधाररूपेण प्रतिष्ठिता अस्ति। लेखे प्रतिपाद्यते यत् भारतीयोत्सवाः प्रायः कृषिचक्रेण सह अविनाभावसम्बद्धाः सन्ति, यथा सस्यरोपणं, सस्यकर्तनं च। मकरसङ्क्रान्ति, ओणम्, उगादि, नवान्नम् इत्यादयः पर्वाणः कृषिसम्बद्धजीवनपद्धतेः द्योतकाः सन्ति, येषु प्रकृतिप्रति कृतज्ञताभावः, सामाजिकैक्यम् तथा पारम्परिकज्ञानसंरक्षणं दृश्यते।

अस्य अध्ययनस्य माध्यमेन ज्ञायते यत् भारतीयसंस्कृतिः मूलतः कृषिसंस्कृतिः एव अस्ति, यत्र उत्सवाः न केवलं आनन्दप्रदाः, अपितु वैज्ञानिकदृष्ट्या स्वास्थ्यसंरक्षणाय, आर्थिकदृष्ट्या ग्राम्यजीवनस्य सुदृढीकरणाय च उपकारकाः भवन्ति। कृषिः समाजस्य मेरुदण्डः इव कार्यं करोति, तथा पर्वाणि तस्य जीवने उत्साहं, एकतां च संवर्धयन्ति।

अतः वक्तुं शक्यते यत् कृषिः तथा भारतीयपर्वाणि परस्परं पूरकत्वेन भारतीयजीवनदर्शनस्य आधारस्तम्भौ स्तः, तयोः संरक्षणं भविष्यस्य संतुलितविकासाय अनिवार्यम्।

**कूटशब्दाः –**
कृषि - भूमेः कर्षणं, बीजारोपणं, सस्यसंवर्धनं च, येन अन्नोत्पादनं क्रियते।
भारत – भूखण्डः यत्र भारतीयाः निवसन्ति।
पर्व - पर्व इति शब्दः विशेषः उत्सवः वा धार्मिकसमारोहः, यः समाजे आनन्दं एकतां च जनयति।
अध्ययनम् - ज्ञानप्राप्तये शास्त्रादीनां मननपूर्वकं अधिगमनम्।

**उपक्रमः–**

खाद्यवस्त्रवासगृहः मौलिकावश्यकता अस्ति सामाजिकानाम्। स्वचिन्तनशक्त्या, स्वबुद्ध्या, स्वविवेकशक्त्या स्वात्मानं सृष्टौ सर्वश्रेष्ठः रुपेण प्रमाणयति मानवः। जीवनयापनप्रणाली गोष्ठीबद्धरुपेण निर्वहति सामाजिकप्राणी मानवः। मानवस्य सर्वप्रथममौलिकाधिकारः भवति भोजनम्। जीवस्यसृष्ठिःन सम्भवति भोजनं विना। अन्नम वै परं ब्रम्हः इति वेदोक्तिः अपि प्रतिपादयति जीवे जीवत्वं साधयितुमन्नमेवकारणमिति। अन्नमेवकारणं प्राणीनां प्राणतत्वस्य। यदा परमात्मना सृष्टेः संरचना साधितं तदानीमन्नमुत्पादयितुं मानवमनसि कौशलमेतदारोपितम्। कालक्रमेणान्नमुत्पादनकौशलं कृषिः इति प्रसिद्धम्।

कृषिः भारतीयानां मेरुदण्डः वत्। न केवलमुदरपूर्णार्थमपितु कृषिः भवति भारतीयसंस्कृतेः, भारतीयपर्वणां, सामाजिकतायाः,मानवमूल्यानां पोषक भवति। भारतीयाः कृषिकार्यं न केवलं व्यवसायः इति चिन्तयन्ति परन्तु भारतीयाः कृषिं जीवन जीवितुं साधनं इति चिन्तयन्ति। कृषिः प्रतिपादयति भारतीयानां सहनशीलता-शान्तस्वभावस्य। प्रत्यक्षपरोक्षरुपेण प्रभावयति भारतीयकृषिः भीरतीयपर्वाणी। अस्ति कश्चित् कृषिः तथा भारतीयपर्वणां परस्परान्योन्याश्रित भावः लेखे संम्प्रति उपस्थाप्यते।

भारतीयसंस्कृतिः, भारतीयकृषिः सर्वप्राचीनं भवति। भारतदेशस्य 70% जनाः प्रत्यक्षरूपेण तथा 30% जनाः परोक्षरुपेण कृषिकर्मणी निर्भराः भवन्ति। भारते कृषिकार्यम् न केवलं भोजनार्थमेव सीमितः अपितु साहित्यं , संस्कृतिमपि प्रभावयती।

**कृषेःइतिहासः–**

भारतीयप्राचीनधर्मग्रन्थे ऋग्वेदे, अथर्ववेदे कृषिकार्यं भगवदाराधना इति वर्णितमस्ति। इन्द्रः तथा प्रजन्य बृष्टेः देवता इति वर्णितमस्ति। वैदिककाले उत्तमकृषिकार्यार्थं इन्द्रवरुणादि देवानामाराधना क्रियते स्म। गोरक्षा, पशुपालनसंरक्षणाद्यपि अन्तर्भवति कृषिकार्ये। यज्ञयागाद्यनुष्ठानाद्याचरणसमये शष्यानाम् अग्नौ आहुतिमाति प्रदानं, दानदक्षिणायां धान्यं, भोजनादि दानं संम्प्रतिमपि प्रचल्यमानपरम्परा अस्ति। क्रमशः धान्यादि संचयप्रक्रा आगता। यदा निर्द्धिष्टसमये कर्तनं कृत्वा गृहं प्रति आनयन्ति स्म तथा स्वस्य प्रथमधान्यं पाकंकृत्वा स्वग्राम्यदेवतानां स्वेष्टदेवतानां पार्श्वे प्रसादरुपेण प्रदानं परम्परा आसीत्। सम्प्रतिमपि प्रक्रियैषा दर्शयति भारतीयानां कृषिप्रति आन्तरिकता तथा भगवतः प्रति समर्पणभावः। कर्ममाधारिकृत्य वर्णाश्रमव्यवस्था कल्पितमसीत्। अर्चनादि ये कुर्वन्ति ते ब्राम्हणाः, युद्धं कृत्वा संरक्षणं कुर्वन्ति ते क्षत्रियाः, ये कृषि वाणिज्यं कुर्वन्ति ते वैष्याः, ये सेवां कुर्वन्ति ते शूद्राः। कृषिः तथा वाणिज्यं वैष्यैव कुर्वन्ति स्म।

**कृषिशब्दस्यव्यूत्पतिः–**

कर्षणमेव कृषिः। सर्वस्यापि श्रमप्रधानकर्मणः अद्य कृषिरिति व्यवहारोदृश्यते। मध्यकालीन भारते कृषिः जजमानी पद्धतेः साकं संम्बन्धितः आसीत्। जजमानीपद्धतिः नाम एकस्यगृहे यत् अस्ति तत् प्रत्यर्पणं कृत्वा यत् गृहे नास्ति तत् आनयनं भवति स्म। अर्थात् यदि एकस्यगृहे धान्यमधिकमस्ति तस्य गृहे काष्ठं वा गृहोपकरणं वा नास्ति तर्हि सः धान्यं प्रदाय यत् आवश्यकं तत् स्वीकरोति स्म। यदा अनुष्ठानादि आसीत् यजमानस्यकृते दक्षिणारुपेण स्वक्षेत्रे यत् धान्यादि उत्पादितमासीत् तत् प्रदानं व्यवस्थासीत्।

**कृषिः तथा भारतीयोत्सवाः-**

उत्सवाणां देशः भारतदेशः, समग्रप्रपञ्चे स्वस्याद्वितीया जीवनशैली, आचारव्यवहारः संस्कृतिः परम्पराः,आध्यात्मकमूल्यानां प्रतिष्ठितम् विश्वगुरूरुपेण। भारतः एकः देशः यस्यार्थव्यवस्था देशस्य कृषिकर्मणि निर्भरं करोति। पारम्परिककालादेव जीवनप्रणाली कृषिकर्माधारितः प्रचलति तदर्थं भारतीयाणाम् उत्सवपरम्पराः अपि प्रमुखतया कृष्याधारिताः दरिदृश्यते। कृषिभित्तिकोत्सवाः भारतस्य बहुस्तरीय-बहुपक्षीयसंस्कृतेः महत्वपूर्णांशः वर्तते। भारतदेशे विभिन्नप्रान्तेषुविभिन्नाः पर्वाणां पालनं क्रीयते। कृषिकार्यस्य महत्वं परस्परसहानुभुतेःसंक्रमणं, भ्रातृत्वभावस्यजागरणं तथा च मनसि प्रकृतिप्रेम भावनायाः जागरणं क्रीयते। कृषिभित्तिकपर्वाणी संवत्सरस्यारम्भः सूचयति। सूचयति सामाजिकानां प्रकृतिंप्रति सम्मान्नम्। प्रकृत्यैव जगति प्राणीनां प्राणभूतस्यकारणं भवति। पर्वपालनं होमयज्ञादि केवलं न अपितु स्वस्यास्तित्वस्य प्रमाणं प्रयच्छति। संस्कृतिपरम्परायाः लेकज्ञानस्य जीवनशैल्याः संरक्षयति पर्वणा पालनं वैविध्येपि ऐक्यं इति जीवनसूत्रस्य संरक्षणं करोति भारतीयपर्वाणी।

कृषिभित्तिकपर्वेषु मकरसंक्रान्तिः प्रमुखः तथा आभारते परिपाल्यमाना पर्व। नूतनवर्षस्य प्रारम्भः तथा शैत्यकालिन कषिकार्यस्य समाप्तेः सन्धिकाले परिपाल्यते मकरसंक्रान्तिः। पश्चिमबङ्गाले ओडिशायां च मकरसंक्रान्तिः, तमिलनाडुराज्ये पोङ्गल, हिमाचलप्रदेशे माघसाजी, असामराज्ये भोगलिबिहु, राजस्थाने सकराट, बिहार तथा उत्तरप्रदेशे खिचडिपरब, पञ्जाबतथा हरियाणा राज्ये लौहडि, गुजुराते उत्तरायणम् आदि विभिन्न नामविशेषे संक्रान्तेः पालनं विधियते। सूर्यस्य मकरराशौप्रवेशसमये संक्रान्तेः पालनं विधियते। तस्मिन संक्रमणकाले शरिरेजायमानं प्रतिक्रियायाः निवारणार्थम् अक्षुरसःतिलम्, गुडं च भोजनरुपेण स्वीकरणस्य विधानमस्ति। कृषिजातद्रव्यानां साफल्येन उत्पतिः जातमितिधिया भगवन्तसूर्यदेवं तथा कृषिभूमौ निवसमान वन्यजन्तुन् कृतज्ञता समर्पणपर्व भवति संक्रान्तिः। असामराज्ये परिपाल्यमान बिहु भोगलिबिहु, माघबिहु नाम्ना अपि ज्ञयते। त्रयदिनात्मिकापरिपाल्यमानमस्मिन् पर्वणी प्रथमदिनम् उरुका, द्वितीयदीनम् बिहु, रुपेण परिपाल्यते।

केरलप्रान्तस्य प्रमुखकृषिभित्तिक पर्वः ओणम्। कृषिकार्यस्य समाप्तेः परं यदा शष्यानां गृहानयनवेलायां ओणमपर्व परिपाल्यते। दशदिनात्मकेस्मिन पर्वणि गृहस्य सज्जिकरण नारिकेलपत्रे तथा कदलीपत्रे क्रीयते। विषेशदिनेस्मिन् यत् प्रसादरुपेण भगवतः समीपे समर्पणं क्रीयते तद् सद्या इत्युच्यते।कदलीपत्रे सद्यसेवनस्य प्रथामपि वर्तते।

महाराष्ट्रे कृषिभित्तिकपर्वरुपेण परिपाल्यते गुडपडवा। मार्चमासः अथवा एप्रिलमासे बेङ्गालिनूतनवर्षस्य अन्तिमकाले आचरणं क्रीयते। गुडिपडवा इति शब्दे गुडि नाम बृहदेकः स्तम्भः। एकस्मिन् स्तम्भे आम्रपत्रम् तथा एकं पात्रम् संस्थाप्य गृहस्यपुरतः स्थापयन्ति। महाराष्ट्रियजनाः विश्वसन्ति यत् नकारात्मकशक्तेः विनाशं कृत्वा साकारत्मकशक्तेः स्थापनं भवति गुडिपडवोत्सवे गृहस्यपुरतः स्तम्भः स्थापनेन। श्रीरामचन्द्रस्य विजयदिवसरुपेण्यपि गुडिपडवा परिपाल्यते।

कर्णाटिके तथा आन्ध्रप्रदेशे कृषिभित्तिकपर्वरूपेण परिपाल्यते उगादि। अगाधिपर्व परिपाल्यते नूतनवर्षारम्भ तथा कृषिभित्तिकपर्वरूपेण। आन्ध्रपदेशराज्ये हिन्दुनववर्षस्य पारम्भः उत्सवेसः आचर्यते। जनाः विश्वसन्ति यत् – भगवान्ब्रम्हा अस्मिन् दिने ब्रम्हाण्डस्य निर्माणं कृतमिति। जनाः महाडम्बरेण पालनं क्रीयते। कटुकषायाम्लमधुरादिषड्रसाणाम्अस्मिनदिने सेवनं दर्शयति प्रकृतिमातरं प्रति सम्मानम्। प्रसादमिदं उगादिपचडि इत्युच्यते। नूतनसंबत्सरस्यारम्भः अस्मिनदिने भवति। हिमाचलप्रदेशे कृषिभित्तिकपर्व माघिलज्ज ग्राष्मकालिनकृषिभित्तिक पर्वः। रजपर्व, मकरसंक्रान्तिः, नवान्नं, परिपाल्यते कृषिभित्तिकोत्सवरुपेण। अक्षयतृतीयादिवसे ओडिशाप्रान्ते कृषिकार्यस्य प्रारम्भः भवति। अस्मिन् दिने बीजारोपणपूर्वकं मृत्तिकापूजनं महाडम्बरेण

सम्पाद्यते। जनाः प्रकृतिमातरं पूजयन्ति तथा अनुरोधकुर्वन्ति यथा कृषिकार्यस्यारम्भः समाप्तिः मध्ये विन्घं न भवतु इति। प्रक्रियैषा ग्रन्थारम्भे मङ्गलाचरणाचरणवत्भवति।नवान्नं पश्चिमोत्कले परि-पाल्यमानं कृषिभित्तिक पर्वमस्ति। भाद्रवमासस्य पञ्चमीतिथौ पर्वमेतत् परिपाल्यते। भुदेव्याः पूजनान्तरं गोमातुः पूजा, वाहनानां पूजा तदन्तरं प्रसादसेवनस्य अस्तिनियमः। नूतनवस्त्रं शुद्धचित्तं तथा नूतनशष्येनिर्मितं भोजनेनसाकं अस्मिन् पर्वणि।परम्परा वर्तते यत् ये जेष्ठाः भवन्ति ग्रामेपरिवारे, ते कनिष्ठान् आशिर्वादः प्रयच्छन्ति तथा ये कनाष्ठाःये ज्येष्ठान् भूमिष्ठः प्रमाणं कुर्वन्ति। सायकाले मिष्टान्नं, भोजनादि भवति। न केवलं कृषिभित्तिक अपितु सामाजिकबन्धुत्व भ्रातृत्वस्यापि पर्व भवति नवान्नम्।

गुजराटराज्ये उत्तरायणपर्व पाल्यते कृषिभित्तिकपर्वरुपेण। जनाः विश्वसन्ति यत् अस्मिनदिने सूर्यस्यकिरणः यथा प्रखरः भवति कृषिकार्यः तथा सुष्टुरुपेण तथा कृषकाणां भाग्यं तथैव औज्वलं भवति। जनाः पत्रेनिर्मितं पतङ्गमुड्डयनपूर्वकं पर्वमेतत् परिपालयन्ति। भारतीयपर्वणी मिष्टान्नवितरणं सूचयति परस्पर भ्रातृत्वभावस्य । भारतीयोत्सवाः उपस्थापयति मानवस्यमूलं प्रकृत्यैव भवति।अतः प्रकृत्याधारितः भवति मानवस्य जीवनशैली।

**निष्कर्षः-**

**'कृषिः तथा भारतीयपर्वणी'** इत्यस्य शोधपूर्णमध्ययनस्य अन्ते वयं एतद् निष्कर्षं प्राप्तुं शक्नुमः यत् भारतीयसंस्कृतिः मूलतः कृषिसंस्कृतिः एव अस्ति। अस्माकं पूर्वजैः प्रकृत्याः चक्रं दृष्ट्वैव उत्सवानां रचना कृता।यदा कृषिः समृद्धा भवति, तदा समाजः अपि समृद्धः जायते। पर्वाणि समाजे एकतां सामञ्जस्यं च स्थापयन्ति। कृष्यैव राष्ट्रस्य आधारस्तम्भः, उत्सवाः च तस्य प्राणभूताः सन्ति। यदि स्वपरम्पराणां संरक्षणं कर्तुं इच्छामः, तर्हि कृषिसंस्कृतेः रक्षणं अनिवार्यम् अस्ति। अस्य शोधस्य मुख्याः अंशाः अधोलिखिताः सन्तिः यथा-

- **प्रकृति-संस्कृति-समन्वयः :** शोधनेन सिद्धं भवति यत् प्रायः सर्वेऽपि भारतीयोत्सवाः सस्यरोपणकालेन (Sowing) अथवा सस्यकर्तनकालेन (Harvesting) सह साक्षात् सम्बद्धाः सन्ति। उदाहरणार्थं, 'मकरसङ्क्रान्तिः' केवलं सूर्यस्य राशिपरिवर्तनं न, अपि तु 'रबी' सस्यानां स्वागतस्य पर्व अपि अस्ति।
- **वैज्ञानिकदृष्टिकोणः** : ऋतुपरिवर्तनेन सह अस्माकं भोज्यपदार्थाः अपि परिवर्तन्ते। उत्सवेषु प्रयुक्तानि अन्नानि (यथा- तिलम्, गुडः, नूतनतण्डुलः) तस्मिन् ऋतौ स्वास्थ्यरक्षणाय वैज्ञानिकाधारं वहन्ति।
- **आर्थिकसामाजिकदृढता :** उत्सवाः कृषकानां श्रमाय विश्रामं ददति तथा च समाजस्य सर्वे वर्णाः कृषिजन्यवस्तुभिः परस्परं सम्बद्धाः भवन्ति। एतेन ग्रामीण अर्थव्यवस्था सुदृढा जायते।
- **कृतज्ञताभावः** : एते उत्सवाः अस्मान् पर्यावरणस्य रक्षणाय प्रेरयन्ति। यदा वयं गोवर्धनपूजां वा पोंगलपर्वणि पशूनां पूजां कुर्मः, तदा वयं पारिस्थितिकी-तन्त्रस्य (Ecosystem) महत्त्वं अङ्गीकुर्मः।

अतः निष्कर्षरूपेण वक्तुं शक्यते यत् **"कृषिः केवलं जीविकोपार्जनस्य साधनं न, अपि तु भारतीयजीवनदर्शनस्य आधारः अस्ति।"** यदि वयं स्वस्य समृद्धं सांस्कृतिकविरासतं रक्षितुम् इच्छामः, तर्हि कृषिपरम्पराणां कृषकानां च सम्मानं संवर्धनं च अनिवार्यं वर्तते। भविष्ये अपि एतासां परम्पराणां संरक्षणं आधुनिकयुगे पर्यावरणसन्तुलनाय अतीव आवश्यकं भविष्यति। एवमेव भारतीयजीवनपद्धतौ कृषिः तथा पर्वाणि द्वे अपि परस्परं पूरके स्तः। अस्माकं देशस्य उन्नतिः कृषकानां समृद्धौ एव अस्ति।

**सन्दर्भग्रन्थसूची -**


- Rigveda. (n.d.). *Rigveda*. Translated by Griffith, R. T. H. Varanasi: Chowkhamba Sanskrit Series.
- Atharvaveda. (n.d.). *Atharvaveda*. Translated by Whitney, W. D. Delhi: Motilal Banarsidass.
- Kautilya. (2010). *Arthashastra*. Translated by R. Shamasastry. Mysore: Mysore Printing Press.
- R. S. Sharma. (2005). *India's Ancient Past*. New Delhi: Oxford University Press.
- Food and Agriculture Organization. (2020). *The State of Food and Agriculture 2020*. Rome: FAO.
- Romila Thapar. (2002). *Early India: From the Origins to AD 1300*. New Delhi: Penguin Books.
- Ministry of Agriculture and Farmers Welfare. (2022). *Agricultural Statistics at a Glance*. New Delhi: Government of India.
- D. N. Jha. (2004). *Ancient India: An Introductory Outline*. New Delhi: Manohar Publishers.
- Manusmriti. (n.d.). *Manusmriti*. Translated by G. Buhler. Delhi: Motilal Banarsidass.
- Indian Council of Agricultural Research. (2021). *Handbook of Agriculture*. New Delhi: ICAR.
- P. V. Kane. (1997). *History of Dharmasastra* (Vol. 2). Pune: Bhandarkar Oriental Research Institute.
- A. L. Basham. (2004). *The Wonder That Was India*. New Delhi: Rupa Publications.
- National Council of Educational Research and Training. (2018). *Indian Economic Development*. New Delhi: NCERT.
- Planning Commission of India. (2014). *Agriculture and Rural Development Report*. New Delhi: Gov-ernment of India.